तपसा नाशकेन” इति श्रुत्यैव कर्मणां विविदिषाहेतुतोक्तेः विविदिषायामेव कर्मकाण्डप्रतिपाद्यकर्मणामुपयोग इत्याकरे स्थितम्।

**कर्म्मकार** त्रि० कर्म्म करोति अभृत्या अण् उप० स०। विना वेतनेन १कर्म्मकारके (वेगार) (कामार) इति प्रसिद्धे सङ्कीर्णजातिभेदे जातिशब्दे विवृतिः। “हरिणाक्षि! कटाक्षेण आत्मानमवलोकय। नहि खड्गोविजानाति कर्म्मकारं स्वकारणम्” उद्भटः।

**कर्म्मकारिन्** त्रि० कर्म्म करोति कृ–णिनि स्त्रियां ङीप्। कर्म्मकारके “तान् विदित्वा सुचरितैर्गूढैस्तत्कर्म्मकारिभिः” मनुः।

**कर्म्मकीलक** पु० कर्म्मणा कीलक इव। रजके जातिभेदे। त्रिका०। [कर्म्मक्षम देहं क्षात्रोधर्म्म इवाश्रितः” रघुः।

**कर्म्मक्षम** त्रि० कर्म्मणि क्षमः ७त०। कर्मकरणसमर्थे “आत्म-

**कर्म्मक्षेत्र** न० कर्म्मणां क्रियानुष्ठानानां क्षेत्रम्। जम्बुद्वीपान्तर्गते नवसु वर्षेषु अनुष्ठानदेशे भारते वर्षे। नववर्षाण्युक्त्वा “अत्रापि भारतमेव वर्षं कर्मक्षेत्रम्। अन्यान्यष्टवर्षाणि स्वर्गिणां पुण्यशेषोपभोगस्थानानि भौमस्वर्गपदानि व्यपदिशन्ति” भाग० ५, १७, १२, १३, कर्मभूमिरप्यत्र स्त्री। “उत्तरं यत् समुद्रस्य हिमाद्रेश्चैव दक्षिणम्। वर्षं तद्भारतं नाम भारती यत्र सन्ततिः” इत्युपक्रम्य “कर्मभूमिरियं स्वर्गमपवर्गञ्च यच्छति”। “अत्र संप्राप्यते स्वर्गोमुक्तिमस्मात् प्रयान्ति च। तिर्य्यक्त्वं नारकित्वञ्च मध्यं चातस्य गम्यते। न खल्वन्यत्र मर्त्यानां कर्मभूमौ विधीयते” विष्णुपु० पराशरवाक्यम्।

**कर्म्मग्रन्थि** पु० कर्मणां ग्रन्थिर्बन्धनमस्मात्। अज्ञानजन्यवासनारूपे दोषे तस्यैव सकलप्रवृत्तिहेतुत्वात्तस्य कर्मबन्धनहेतुत्वात्तथात्वम्।

**कर्म्मचण्डाल** पु० कर्मणा चण्डाल इव। “असूयकः पिशुनश्च कृतघ्नो दीर्घरोषकः। चत्वारः कर्मचण्डाला जन्मतश्चापि पञ्चमः” वशिष्ठोक्तेषु असूयकादिषु चतुर्षु। २राहौ च। “उत्तिष्ठ गम्यतां राहो! त्यज्यतां चन्द्रसङ्गमः। कर्मचण्डाल! योगोत्थं मम पापक्षयं कुरु” ग्रहणमुक्तिस्नानमन्त्रः। राहोश्च असूयकत्वाद्दीर्घदोषवत्त्वाच्च तथात्वम्।

**कर्मचित्** त्रि० चितवान् चि–भूते क्विप् ६त०। १कृतकर्मणि। कर्मणि क्विप् ६त०। २कर्मणा चीयमाने च “कर्मसयान् कर्मचितस्ते कर्मणैवाधीयन्ते कर्मणा चीयन्ते” शत० ब्रा०। १०, ५, २, ८।

**कर्मचित** त्रि० कर्मणा चितः चि–क्त। कर्मनिष्पाद्ये “तद्यथेह कर्मचितोलोकः क्षीयते एवममुत्र पुण्यचितः” वेदपरि० श्रुतिः

**कर्मचेष्टा** स्त्री कर्मणि क्रियायै चेष्टा। क्रियानुष्ठानार्थं चेष्टायाम् “आत्मजन्या भवेदिच्छा, इच्छाजन्या भवेत् कृतिः। कृतिजन्या भवेच्चेष्टा, चेष्टाजन्या क्रिया भवेत्” इत्युक्तेः चेष्टायाः क्रियाहेतुत्वेन तथात्वम् “कर्मचेष्टास्वहः कृष्णः शुक्लः स्वप्नाय शर्वरी” मनुः।

**कर्मचोदना** स्त्री कर्मणि कर्मावबोधने चोदना विधिः। कर्मविषये १प्रेरणारूपे विधौ “कर्मावरोधनं चोदना क्रियायाः प्रवर्त्तकं वचनमिति” मीमा० भा०। चोद्यते प्रवर्त्त्यतेऽनया बा० करणे अ ७त०। २कर्मप्रवृत्तिहेतौ ज्ञानज्ञेयज्ञातृरूपेऽर्थे च। “ज्ञानं ज्ञेयं परिज्ञाता त्रिविधा कर्मचोदना” गीता। “ज्ञानमिष्टसाधनमितिबोधः, ज्ञेयमिष्टसाधनं कर्म, परिज्ञाता तज्ज्ञानाश्रयः त्रिविधा कर्मचोदना चोद्यते प्रवर्त्त्यतेऽनयेति चोदना ज्ञानादित्रितयं कर्मप्रवृत्तिहेतुरित्यर्थः। यद्वा चोदनेति विधिरुच्यते तदुक्तं भट्टैः—“चोदना चोपदेशश्च विशिष्टैकार्थवाचिनः” इति ततश्चायमर्थः–उक्तलक्षणं त्रिगुणात्मकं ज्ञानादित्रयमवलम्ब्य कर्मविधिः प्रवर्त्तते इति” श्रीधरः।

**कर्मज** त्रि० कर्मणो कर्मजन्याद्दृष्टात् जायते जन–ड। कर्महेतुके रोगादौ। रोगादिव्याधयो हि नानाविधाः यथोक्तं भावप्र०—

“तेषु स्वाभाविकाः केचित्केचिदागन्तवः स्मृताः। मानसाः केचिदाख्याताः कथिताः केऽपि कायिकाः। तत्र स्वाभाविकाः शरीरस्वभावादेव जाताः। क्षुत्पिपासा सुषुप्सा च जरामृत्युप्रभृतयः। अथवा स्वस्वभावादुत्पत्ते जाता स्वाभाविकाः सहजा इति यावत्। ते च जन्मान्धत्वादयः। आगन्तवोऽभिघातादिजनिताः। अथवा जन्मोत्तरभाविनः कामक्रोधलोभमोहभयाभिमानदैन्यपैशुन्यशोकविषादेर्ष्यासूयामात्सर्य्यप्रभृतयः। अथवोन्मादापस्मारमूर्च्छाभ्रममोहतमः संन्यासप्रभृतयः। कायिकाः पाण्डुरोगप्रभृतयः। कर्मजाः कथिताः केचिद्दोषजाः सन्ति चापरे। कर्मदोषोद्भवाश्चान्ये व्याधयस्त्रिविधाः स्मृताः। तत्र कर्मजाः व्याधयः यस्मात्तेनन्दुष्कर्मभवङ्केवलभोगनाश्यम् प्रायश्चित्तनाश्यं वा ततो जाताः न तु दुष्टवातादिदोषेण जनितास्तथा। यथाशास्त्रन्तु निर्णीतो यथाव्याधिचिकित्सितः। न शमं